दो ३/५ ५/५ पुनः ८ इष्टेन १ हतं एकेन गुणितं तदेव १०० अनेन इष्टं १००० भक्ते छेदलवं

२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लीउ.

चपरिवर्षं ५ दृष्टं १०० पंचगुणितं ५०० अष्टभक्तं लब्धं मूलधनं ६२५ मिश्रास्मुतं ७५ इदं कलांतरं
॥करणसूत्रं॥ अथ प्रमाणैर्गुणिताः स्वकालाव्यतीतकालघ्नफलोद्धृतास्ते॥ स्वयोगभक्ताश्च वि
मिश्रनिघ्नाः प्रयुक्तखंडानि पृथक् भवंति॥ ८८॥ स्वकालाः प्रमाणैर्गुणिताः कार्याः पश्चात् व्यतीतका
लगुणिता निजफलानि तैर्भाजिताः कार्याः ततो मिश्रहताः॥ पश्चात् स्वयोगेन भक्ताः संतः पृथक् पृथ
क५ क् प्रयुक्तखंडानि भवंति॥ उदाहरणं॥ यत्पंचकत्रिकचतुष्ककृतानेन दत्तं खंडैस्त्रिभिर्गणक निष्कशतं षडूनं॥ मा गणक५
सेषु सप्तदशपंचसु तुल्यमाप्तं खंडत्रयेपि हि फलं वद खंडसंख्यां॥ ८९॥ यत्षडूनं निष्कशतं त्रिभिः खं
डैः पंचकत्रिकचतुष्ककृतानेन दत्तं तेन सप्तदशपंचसुमासेषु तुल्यमेव खंडत्रये एतस्तत्र फलं खंडसं
ख्यां च वद न्यासः

१	७	१	१०	१	५
१००	०	१००	०	१००	०
५	०	३	०	४	०

७ १० ५ पंचभिरप मच्छेदाः योगः अ

स्वकालगुणिते न्यासः

१००	१००	१००
३५	३०	२०

व्यतीतकालाः पायोगार्थं स

वर्तितः $\frac{३०}{७}$ $\frac{२०}{६}$ $\frac{२०}{४}$ पं पंचभिरप तितज्जाते एतत्रयः मिश्रेण ९४

$\frac{४८०}{१६८}$	$\frac{५६०}{१६८}$	$\frac{८४०}{१६८}$	$\frac{१८८०}{१६८}$	$\frac{२३५}{२१}$

हताः $\frac{१९८०}{७}$ $\frac{१९८०}{६}$ $\frac{१९८०}{४}$ स्वयोगभक्ताः $\frac{२३५}{२१}$ छेदं लवं पुरावर्त्य $\frac{२१}{२३५}$ अं $\frac{२१}{२१}$ न्नाहति छेद

रूपतिः गुणितानि फलानि ३५।३०।२०

३०	२०	३०
७	६	४

87

२९ वधेनेति हतेजातं ३९४८० ३९४८० ३९४८० १९७४५ १४१० ९८० भक्तेलब्धानिखंडानि २४ २८ ४२ प्रकारांतरेणप्रमाणे
गुणिताः स्वकालाः १०० १०० १०० १०० व्यतीतकालाः ७ १० ५ तैः फला
नि ५ ३ ४ हतानि ३५ ३० २० एते ः प्रमाणहताः स्वकालाः १०० भक्ताः न्यासः १०० १०० १०० / ३५ ३० २०
आद्यस्यपंचभिः द्वितीयस्यदशभिः तृतीयस्य विंशत्यापवर्तितेजातं ७ ३ ५
एषांसमछेदाः ६० ७० १०५ / २१ २१ २१ योगः २३५ / २१ एतेत्रयः मिश्रेण ९४ हताः १८८० ९४० ४७० / ७ ३ १
२८ ततः योगेनभक्ताः २३५ / २१ छेदंलवं परिवर्त्येतिहतेजातं
२१ अंशाहतिश्छेदवधेनेतिन्या २१ सः ३९४८० १९७४० ९८७० / १९७४५ ७०५ २३५ छेदैर्भक्तानिखंडानि २४ २८ ४२
२३५ एषांयोगेनषड्नवतिः ९४ वृद्धिस्तूपंचरा त्रिकेनानेयातथाचानुपा
तः यदिमासेशतस्यपंचवृद्धिः तदासमस्तमूलेषु चतुर्विंशते ः कियती एवंखंडद्वयस्यापिफलांतरं
त्रिखंडेषुतुल्यं ९२ / ५ प्रक्षेपकामिश्रहता विभक्ताप्रक्षेपयोगेनपृथक्फलानि ॥ ८४ ॥ प्रक्षेपकाः मिश्र
धनेनगुणिताः प्रक्षेपयोगेनभक्ताः संतः पृथक्फलानिस्युः ॥ उदाहरणं ॥ पंचाशदेकसहिता
गणकाष्टषष्टिः पंचोनितानवतिरादिधनानितेषां ॥ ४९ हेगणक एकपंचाशत् ॥ अष्टषष्टिः पंचाशी २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰उ॰

तिः एषां एतानि मूलधनानि तैस्त्रिभिरपि एकीकृतधनैर्वणिग्भिः वाणिज्यतः वातत्रयं प्राप्तं
तेषां धनानि विभज्य वद न्यासः प्रक्षेपकाः ५१ ६८ ८५ मिश्र ३०० हताः जाताः १५३०० । २०४००
२५५०० प्रक्षेपयोगेन २०४ भक्ते लब्धानि लाभसहितधनानि ७५ । १०० । १२५ एतानि आद्यधनैः ५१
६८ ८५ ऊनानि लाभाः २४ ३२ ४० अथवा मिश्रधन ३०० माद्यधनैक्योनं २०४ अस्मिन् ९६ प्रक्षेप
५१ ६८ ८५ गुणिते प्रक्षेपयोगभक्ते लाभाः भवंति ३ इदं त्रैराशिकं ॥ अथ करणसूत्रं ॥ भजेच्छिदोंशैरथ
तैर्विमिश्रै रूपं भजेत्स्यात्परिपूर्तिकालः ॥ ५० ॥ छिदः छेदान् अंशैर्भजेत् तत्र यानि लब्धानि तैर्मिश्रैरेकी
कृतै रूपं भजेत् एवं कृते सति परिपूर्तिकालो भवति ॥ उदाहरणं ॥ ये निर्झरा दिनदिनार्धतृतीयषष्ठैः
सम्पूरयंति हि पृथक् पृथगेव मुक्ताः ॥ वापीं यदा युगपदेव सखे विमुक्तास्ते केन वासरलवेन तदा वद त्वम्
५१ ये निर्झराः पृथक् पृथक् मुक्ताः संतो दिनदिनार्धतृतीयषष्ठैः वापीं पूरयंति हे सखे चत्वारोपि ते यु
गपदेव मुक्ता यदा तदा केन दिनलवेन तां पूरयंतीति वद न्यासः

१	१	१	१
१	२	३	६

छिदोंशैर्भक्ताः एवं ते मिश्रैः
छेदः १२ रूपं १ भक्तं जातं $\frac{१}{१२}$ दिनद्वादशांशेनेनसा इयं घटीद्वयेन पूरयंतीत्यर्थः ॥ अथवानुपातः यद्ये
कानिर्झरसमये एकदिने तेहि सकलनिर्झरदिनांशयोगेन किं इत्यत्र छायाग्रंदौ फले ह्रासो दृश्यते ः

वापीपूरयंति ३

84

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोऽथ स्तैर्वा त्रिकेनाप्येतत्सिध्यति ॥ अथ ॥ क्रयणसूत्रं ॥ पण्यैः स्वमौल्यानि भजेत्स्वभागैर्हत्वा तदैक्येन भ
जेच्च तानि ॥ भागांश्च मिश्रेण धनेन हत्वा मौल्यानि पण्यानि यथाक्रमं स्युः ॥ ४० ॥ स्वमौल्यानि स्वस्वभा
गैर्हत्वा पण्यैः भजेत् ॥ तानि भक्तसिद्धानि मौल्यानि भागांश्च मिश्रेण धनेन हत्वा तदैक्येन भजेत् ॥ यथा
क्रमेण लब्धानि मूल्यानि पण्यानि च स्युः ॥ विपणौ वर्तमानतुल्यधान्यादिमानं पण्यं मौल्यं काकिणी
द्रम्मादि भागास्तु धान्याद्यंशाः ॥ उभयत्र मौल्यानि पण्यैर्भक्तानि तत्र ये लब्धे तयोरैक्यं भाजको भव
ति ॥ अथ मौल्यानि ॥ मिश्रेण हत्वा भाजकेन हृत्वा लब्धं पण्यानि भवन्तीत्यर्थः ॥ अथोदाह
रणं ॥ सार्धं तंदुलमानकत्रयमहो द्रम्मेण मानाष्टकं मुद्गानां च यदि त्रयोदशमिता एता वणिक्काकिणीः
आदायार्पय तंदुलांशयुगलं मुद्गैकभागान्वितं क्षिप्रं क्षिप्रभुजो व्रजेम हि यतः सार्थोऽग्रतो यास्यति
॥ २५ ॥ हे सखे द्रम्मेण सार्धतंदुलमानकत्रयं लभ्यते मुद्गानां द्रम्मेण मानाष्टकं लभ्यते हे वणिक् ए
तास्त्रयोदशमिताः काकिणीः आदाय मुद्गैकभागान्वितं तंदुलांशयुगलं क्षिप्रमर्पय यतो वयं क्षिप्र
भुजः ॥ तत्र कारणमाह ॥ यत इत्यादि ॥ कुडवाद्यास्ते चतुर्गुणाः प्रस्थाढकमानिकाः खार्य इति मानप्रका
रेणैकं ॥ न्यासः ७/२ ८/१ १/२ १/१ स्वमौल्यानि १ १ स्वभागैः २ १ पण्यैः ७/२ ८/१ भजेत् छेदं लवं च परिवर्त्य स्वस्य
हृतानि २ १

ली॰उ

३ ९ अंशाहतिः ५ ९ एतानि मिश्रधनेन १३ ६४ गुणितानि ५२ ४४८ १३ ५१२ भागाश्च ३ १ मिश्रेण १३ ६४
लब्धा २६ ६४ १३ ६४ तैरैक्येन स्वभागहतपण्य म लस्वमोल्य योरैक्येन समच्छेदे
अनयोरैक्येन ७८ ५६ प्रथमं ५२ ४४८ भजेत् छेदंलवं च परिवर्त्य ४ ५ न्यासः ५२ ४४८ ५६ ७
५२ ७ ५६ ५६ अन्योन्यांशाहरयोः च योर्द्वा मिश्र चतुर्द्वाभि क्रमादपव नैहत
न्यासः ४ ३२ ४ ३ अंशाहति छेदवधः १६ ९६ उपर्यंकेनापवर्त्य हृते जातं तंडुलमोल्यं ६ द्वितीयस्य तदैक्येन
छेदंलवं च परिवर्त्य न्यासः १३ ५१२ ५६ ७ अन्योन्यांशाहरयोः त्रयोदशभिरष्टभिः अपवर्त्य
न्यासः १ ६४ ७ अंशाहतिः छेदवधः ७ १९२ लब्धं मुद्गमोल्यं॥ अथ तृतीयस्य छेदंलवं च परिव
र्त्य न्यासः २६ ५६ ६४ ३९ अन्योन्यांशाहरयोस्त्रयोदशभिरष्टभिरपवर्त्य न्यासः ३ ७ अंशाह
तिः छेदवधः २४ न्यासमपवर्त्य लब्धं तंडुलभागाः ३ चतुर्थ छेदंलवं परिवर्त्य न्यासः १३ ६४ ५६ ३९ स्प४
अन्योन्यांशाहरयोर्द्वाभिरष्टभिरपवर्त्य न्यासः १ २ अंशाहति छेदवधेन लब्धं मुद्गभागः २४ अत्र
तंडुलमोल्यं ६ द्रम्मस्य षष्ठोंशः द्रम्मस्य चतुः वष्ठि काकिणी रूपत्वेन उपरितनो कृश्य
तुः पण्यां गुण्यो हरेण भाज्यः लब्धाः काकिण्यः १० पञ्चात्तस्य षोडशांशपणास्तत्वेन षोडशभिः हृते

91

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३१ हरभक्ते लब्धो पणैयो २ शेषं चतुर्भिर्गुणितं हरभक्ते लब्धे काकिण्यो २ योगे फलं तदेव शेषं ४
उपरितनांको विंशतिगुणो हरभक्तः लब्धाः वराटकाः १२ शेषं ६ द्वाभ्यां अपवर्तितं लब्धा व स
टक भागाः ३ एवं मुद्रामोल्यं ७/१२ उपर्यंकेषु चतुःषष्टिगुणिते ६ ४४८ हरभक्ते लब्धे काकिण्यो
२ शेषं ९६/१९२ शेषं विंशतिगुणं १९२०/१९२ हरभक्ते लब्धा वराटकाः ६ शेषं १९२ १२८/१९२ चतुःषष्ट्याप
वर्तितं १९३ लब्धा वराटकभा गाः २/३ तंदुलमाने १२ मानसप्तक स्य द्वादशांशत्वात्
उपरितनांकश्चतुर्गुणः २८/१२ छेदभक्ते लब्धो आढको २ शेषं ४ चतुर्गुणं १६/१२ छिन्ने कृते १
लब्धः प्रस्थः १ शेषं ४ च तुर्गुणं १६/१२ छिन्ने कृते लब्धः कुडवः २ पुनः शेषं ४ चतुर्भिरप
वर्तितं १/३ छेदश्च एते कुडवभागाः १/३ आढको २ प्रस्थः १ कुडवः १ कुडवभागाः १/३ मुद्ग
भागं ७/२४ मानकसप्तकस्य चतुर्विंशांशाः उपरितनोंऽकश्चतुर्गुणः २८ छिन्ने कृते लब्धं १
आढकः १ शेषं चतुर्गुणं १६/२४ भागो न गच्छतीति प्रस्थाभावः पुनश्चतुर्गुणं ६४/२४ हरभक्ते ल
ब्धौ २ कुडवौ २ शेषं १६/२४ षड्भिरपवर्तितो २/३ कुडवभागाः मानके द्वे लः चतुर्थ ३१

92

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रो आढकः तच्चतुर्थांशो कुडवः॥२४॥ अन्यदुदाहरणं॥ कर्पूरस्य परस्य निष्कयुगलेनैकं पलं प्रा
प्यते वैश्यानंदन चंदनस्य च पलं द्रम्माष्टभागेन चेत् अष्टांशेन तथागरोः पलदलं निष्केण मे देहि
तान् भागैरेकचतुष्षोडशाष्टकमितैर्धूपं चिकीर्षाम्यहं॥४६॥ हे वैश्यानंदन उत्कृष्टस्य कर्पूरस्य पल
मेकं निष्कयुगलेन प्राप्यते तथा द्रम्माष्टकभागेन चंदनस्य पलं प्राप्यते तथा द्रम्मस्याष्टांशे
न अगरोरर्धं पलं प्राप्यते तर्हि एकेन निष्केण एकचतुष्षोडशाष्टकमितैर्भागैः क्रमेण मिश्रितान् कर्पूरचंदना
गरून् मह्यं देहि किमर्थमिति चेत् अहं धूपं चिकीर्षामि न्यासः

३२	८	८
१	१	१
१	१६	२

निष्कयोर्द्रम्माः ३२
मौल्यानि ३२ ८ ८ एषु मिश्रभागेः १ १६ ८ क्रमेण गुणिता नित्
रांशयोरपवर्त्येन
जातानि ३२ २ १ पण्ये १ १ १/२ भक्ता नियत्र छेदस्तत्र छेदं लवं परिवर्त्य अंशा
हति छेद ४ ४ ६ निहतेजातानि ३२ २ २ एषां योगः ३६ एतानि ३२ २ २ मि
श्र धनं निष्कः सजातीयतार्थं द्रम्मीभूतः १६ तेन गुणिता नि ५१२ ३२ ३२ योगेन ३६ भागार्थं च
तुर्भिरपवर्तितः १२८/९ ८/९ ८/९ अत्र कर्पूरमौल्ये १२८/९ भक्ते लब्धाः द्रम्माः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५२ १४ शेषो २ षोडशगुणे ३२ हर ९ भक्ते लब्धाः पणाः ३ शेष ५ चतुर्गुणे २० हर भक्ते लब्धे काकिण्यो
२ शेषे २ विंशतिगुणे ४० हर ९ भक्ते लब्धा वराटकाः ४ शेषं वराटक चतुष्कस्य नवमांशाः ॥ ४/९
एवं चंदनमौल्ये ८ हर ९ भक्ते लब्धो द्रम्मः ० शेषं ८ षोडशघ्नं १६ गुणे १२८ हर ९ भक्ते लब्धाः पणाः
१४ शेषे २ चतुर्गुणे ८ हर ९ भक्ते लब्धाः ० काकिणी ० शेषं ८ विंशति २० गुणे १६० हर ९ भक्ते लब्धं
वराटकाः १७ शेषः सप्त वराटकाः तस्या नवमांशाः ७/९ एवमगरुमौल्यस्यापि ॥ लब्धा द्रम्माः
पणाः १४ काकिणी ० वराटकाः १७ वराटकभागाः ७/९ जातानि मूल्यानि ॥ अथ भागोऽर्थ्य १ १६ ८
मिश्रधनेन १६ हत्वा १६ २५६ १२८ योगेन ३६ भक्ते जातं तत्र कर्पूरभागे १६/९ भागेन गच्छतीति च
तुर्भिरपवर्तिते प्राप्ताः पलस्य चत्वारो नवमांशाः ४/९ चंदनस्य भागे २५६/९ २५६ योगेन हरा
र्धं चतुर्भिरपवर्तिते ६४ भागे लब्धानि पलानि ७ ४ ? शेषं पलस्य नवमांशाः १/९ अगरुभा
गे हारार्थं चतुर्भिरपवर्तिते ३२ हारेण हृते लब्धानि पलानि २ शेषं ५ चतुर्गुणे २० हर ९ भ
क्ते लब्धं कर्षद्वयं २ शेषं २ षोडशगुणे ३२ हर ९ हृते लब्धं माषाः ३ शेषं पंचघ्नं २५ हरात् ९ २ ५२

ली॰ पु॰

व्येगुंजे २ शेषं ७ द्विगुणं १४ हरांशं १ यवः शेषं यवपंचकस्य नवमभागाः ५ एवं कर्पूरचंद
नयोरपि बोध्यं कर्पूरस्य अं ॥ नवभिर्विभक्ते लब्धं पलं शेषं ४ चतुर्गुणं १६ हरेर हृतं लब्धं कर्षाः
१ शेषं ७ षोडशगुणं ११२ हरहृतं लब्धाः माषाः १२ शेषं ४ पंचघ्नं २० हरहृते लब्धे गुंजे २ शे
षं २ द्विगुणं ४ हरांशं एवं पुनः पुनः कार्यं ॥ अथ ॥ रत्नजातौ सूत्रं ॥ नरघ्नदानोनितरत्नशेषैरि
ष्टे हृते स्युः खलु मौल्यसंख्याः ॥ शेषैर्हृते शेषवधे पृथक्स्थे र भिन्नमौल्यान्यथवा भवंति ५०
नराः धनिकाः तैर्गुणितं यद्दानं तेनोनितानि यानि रत्नानि तेषां शेषैरिष्टे हृते सति खलु इति निश्चये
येन मौल्यसंख्याः स्युः ॥ अथ भिन्नमौल्यज्ञापनार्थं प्रकारांतरमाह ॥ अथवा शेषवधे नरघ्नदानो
नितरत्नशेषाणां वधे परस्परगुणने पृथक्स्थे शेषैर्भक्ते सति भिन्नमूल्यानि भवंति ॥ उदाहरणं
माणिक्याष्टकमिंद्रनीलदशकं मुक्ताफलानां शतं सद्वज्राणि च पंच रत्नवणिजां येषां चतुर्णां ध
नं संगस्नेहवशेन ते निजधनाद्दत्त्वैकमेकं मिथो जातास्तुल्यधनाः पृथक्वद सखे तद्रत्नमौल्या
नि मे ५१ एषां रत्नवणिजां चतुर्णामेतद्धनं ॥ क्रिं माणिक्याष्टकं ॥ इंद्रनीलदशकं १० मुक्ताफल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांतरातं संतिचत्ता निवङ्गाणिचहीरकास्तेपंच ५ तेसंगस्नेहवशेन । । अथ नादैकैकंमियोदत्वा
तुल्यधनाजाताः हेसखेरत्नमौल्यानि पृथक्पृथक्वद न्यासः ॥ ८ ॥ १० ॥ १०० ॥ ५ नराश्चत्वारः ४
नरघ्नदानं ४ तेरूनानि रत्नानि ४ । ६ । ६ । १ अभिन्नमौल्यार्थं कल्पितमिष्टं ९६ तस्मिन्नेतैः ॥
४ । ६ । ६ । १ भक्ते एकैकं माणिक्यादिमौल्यानि २४ । १६ । १ । ९६ अथ परस्परमेकैकं दत्वा रत्नवणि
जां यानि रत्नानि अवशिष्टानि ५ । ७ । ९७ । २ तान्येभिर्मौल्यैः संगुण्य योगे क्रियमाणे समधनं भव
ति २४ पंचगुणः १२० । १६ । १९६ एतद्योगेजातं २२२ । १६ स सप्तगुणः ११२ । २४ । १९६ योगेजा
ताः २३२ एवमग्रेपि अथवा शेषाणां ४ । ६ । ६ । १ एषां परस्परवधः २३०४ शेषैः ४ । ६ । ६ । १
पृथक्भक्ते जातानि मौल्यानि ५७६ । ३८४ । ३८४ । २३०४ एतदेकैकस्य मौल्यं दत्वा शिष्टानि यानि
रत्नानि तान्येभिः संगुण्य योगे कृते सति समधनत्वं भवति ५७६ पंचगुणः २८८० अन्येर्योगेजा
तं ५५२९ एवमग्रेपि । अथ । अथ सुवर्णगणितेकरणसूत्रं सुवर्णवर्णाहृतियोगराशौ स्वर्णैक्य
भक्ते कनकैक्यवर्णः वर्णो भवेच्छोधितहेमभक्ते वर्णोद्धृते शोधितहेमसंख्या सुवर्णानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰उ॰ चवर्णाः श्रूयते ॥ सामान्यतीनां योगराशिस्तस्मिन् उदृष्टानि सुवर्णानि तेषां योगे जातो यो राशिः स
स्ववर्णैर्गुणितेन भक्ते सति कनकैक्यवर्णः ॥ मिश्रितवर्णो भवतीत्यर्थः ॥ अथ च तस्मिन्नेव वर्णाह
तियोगराशौ शोधितहेम १६ भक्ते सति वर्णो भवेत् ॥ अथ च तस्मिन्नेव वर्णैर्हृते सति शोधित
हेमसंख्या भवेत् ॥ अथ ॥ उदाहरणं ॥ विश्वार्करुद्रदशवर्णसुवर्णमाषा दिग्वेदलोचनयुगप्र
मिताः क्रमेण आवर्तितेषु वद तेषु सुवर्णवर्णस्तूर्णं सुवर्णगणित ज्ञ वणिग्भवेत् कः ॥ त्रयोदश
द्वादशैकादशदशप्रमिताः वर्णाः येषां तानि तेषां सुवर्णानां माषाः दश चतुर्द्विचतुःप्रमिताः क्र
मेण संति हे सुवर्णगणितज्ञ वणिक् तेषु च चतुर्विधेष्वपि सवर्णेष्वावर्तितेषु वह्निगालितेषु स
त्सु कः सुवर्णवर्णो भवतीति एतत्तूर्णं वद ॥ अथ च ते विंशतिरुक्तमाषाः शोधनेन यदि षोडश
स्युस्तदा द्रविणस्य सुवर्णस्य वर्णप्रमाणं किं ॥ अथ ते विंशतिर्माषाः शोधिते शोधने सति न पुं
सकैकाः वर्णः षोडशवर्णं हेम भवति तु वितर्क्य तदा माषाः कति भवंति ॥ न्यासः ॥ ते माषा

१३	१२	११	१०	वर्णाः
१०	४	२	४	माषाः

हतिः १३०।४८। २२।४० योगे २४० अस्मिन् सुवर्णैक्येन २० भक्ते लब्धो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४

वर्णः १२ किंचास्मिन्नेव योगे २५० ऽशोधिते हेम्नः १६ भक्ते लब्धः शोधितवर्णः ॥ ५ अस्मिन्नेव व
र्णेन १५ भक्ते लब्धानो धिते हेमसंख्या १६ करणसूत्रं ॥ स्वर्णैक्यनिघ्नाद्युतिजातवर्णात्सुवर्ण
तद्वर्णवधैक्यहीनात् अज्ञातवर्णो मिश्रसंख्याप्त्या समज्ञातवर्णस्य भवेत्प्रमाणं ॥ स्वर्णैक्यनिघ्नयुति
जात्सुवर्णतद्वर्णयोर्वधस्तदैक्येन हीनात् एवं विधात् युतिजातवर्णात् अज्ञातवर्णे घ्नमिश्रसुवर्ण
तत्संख्यया भक्ते यदाप्तं ज्ञातवर्णस्य हेम्नो वर्णप्रमाणं भवेत् ॥ उदाहरणं ॥ दशेशरवर्णा वसु नेत्र
माषा अज्ञातवर्णस्य षडेतदैक्ये जातेऽस्स्वर्णवेद्वादशकं सुवर्णमज्ञातवर्णस्य वद प्रमाणं ॥ दशावर्ण
हेम्नो ऽष्टौ माषाः एकादशवर्णस्य द्वौ अज्ञातवर्णस्य षट् एषामैक्ये द्वादशवर्णं सुवर्णं जातं हे
सखे अज्ञातवर्णस्य वर्णप्रमाणं वद ॥ न्यासः

१०	११	०
८	२	६

स्वर्णैक्येन १६ युतिजातवर्णे १२ नि
घ्नः १९२ सुवर्णवधैक्येन १०२ हीनं ९० अज्ञात वर्णसंख्यया ६ भक्ते लब्धो वर्णः १५
करणसूत्रं ॥ स्वर्णैक्यनिघ्नो युतिजातवर्णः स्वर्णघ्नवर्णैक्यवियोजितोऽसौ ॥ अज्ञाते
मवर्णाग्निजयोगवर्णो विश्लेषभक्तो विदितान्मिश्रं स्यात् ॥ युतिजातवर्णः स्वर्णैक्यनिघ्नः कार्यः

३४

98

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली० ३

असौ स्वर्णं प्राये वर्णः तदैक्येन वियोजितः कार्यः पुनः अहेम वर्णेज्ञाते हेमवर्णस्तस्याग्निजयो
गवर्णस्य यो विश्लेषस्तेन भक्तेः सन् अविदिताग्निजे अविदिताग्निजप्रमाणं स्यात् ॥ उदाहरणं ॥
दशै प्रवर्णगुणचंद्रमाषाः द्विचित्तथाषोडशाके चूर्तषो ॥ जातस र्वैकहादशांके सुवर्णके तीहतेषो
उत्तावर्णमाषाः स्पष्टं न्यासः

१०	१४	१६
३	१	०

मुतिजातवर्णः १२ स्वर्णैक्य ४ हतः ४८ अयं सुवर्ण
३१ वर्ण १० १४ येगुणिताः ३० १४ तदैक्येन ४४ हीनः ४ असौ अहेमवर्णः १६
अग्निजयोगवर्णयो १२ विश्लेषेण ४ भक्तः लब्धं १ अज्ञातवर्णमानं ॥ करणसूत्रं ॥ साध्येनोनो
नल्पवर्णो विधेयः साध्यो वर्णः स्वल्पवर्णो नितश्च ॥ इष्टक्षुण्णशोषकेवर्णमानेस्यातां स्वल्पा
नल्पयोर्वर्णयोस्ते ॥ अनल्पवर्णः साध्येनोनो विधेयः ॥ तत्र साध्यमूनितकार्यमित्यर्थः साध्यो
वर्णः स्वल्पवर्णेनङ्गूनितः कार्यः ॥ स्वल्पवर्णः तत्र ऊनः कार्यः इत्यर्थः एवं कृते उभयोरवशेषके
केनइष्टेनगुणिते कार्ये ॥ ते स्वल्पानल्पवर्णयोः प्रमाणे स्यातां ॥ पूर्वशेषस्वल्पप्रमाणं परशेष
मनल्पप्रमाणमित्यर्थः ॥ उदाहरणं ॥ हाटकगुटिके षोडशद्वादशवर्णे २ तद्युतौ सरवेत्तातं हाद
शवर्णस्वर्णं व्यूलितयोः स्वर्णयोर्माने ॥ स्पष्टं न्यासः

१६	१०
१	०

अनल्पवर्ण १६ साध्येन १२ ऊनः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६ १०
२ ४

२५ स्वाध्यवर्णे १२ स्वल्पवर्णेन १० उनितः २ शेषके ४ ॥ २ इष्टेन १ हते जातं ४ ॥ २ स्वल्पानल्पवर्णयोः ॥
प्रमाणं दशवर्णं चतुर्माषं षोडशवर्णं द्विमाषं इत्यर्थः ॥ इति ॥ सुवर्णगणितं ॥ छंदश्चित्यादेः सूत्रमा
ह ॥ एकाद्यकोत्तरा अंका व्यस्ता भाज्याः क्रमस्थितैः ॥ परः पूर्वेण संगुण्य तत्परस्तेन भाजयेत् ॥ एका
व्यस्ता ४ द्येकोत्तरा अंकाः स्थाप्याः ते क्रमक्रमस्थितैः स्तैरेव भाज्याः किं कृत्वा परः पूर्वेण संगुण्य पूर्वलब्धां
कैत्यर्थः तत्परस्तत्परे लोपेन तस्माद्धृकात्परस्तत्परेण पूर्वं भाजकात्परेण क्रमस्थितेन भाज्यमित्य
र्थः ॥ एवमग्रेऽपि ज्ञेयमाह एकेति ॥ अस्य विधेः संज्ञामाह ॥ वेद इति ॥ अथोपयोगं दर्शयति मुखावले
न भेदादौ खंडमेरौ च शिल्पके वैद्यके रसभेदीयत न्योक्ते विस्तरभयान्न ॥ मुखावलनभेदादौ राजगृह
दौ वायुसंचारार्थं भित्तिच्छिद्रादि तद्वहनस्य भेदादौ इति केचित् ॥ अन्ये तु मूषाउच्चतर भूमयस्तासां
वहनानि अलिंदादि तद्भेदादि विस्तारः ॥ तथा खंडमेरौ संगीतशास्त्रोक्ते वैद्यकशास्त्रोक्ते रसभेदे
अस्योपयोग इत्यर्थः ॥ मुखावहनभेदादि विस्तरभयान्नोक्तं ॥ तत्र तावच्छंदश्चित्युदाहरणं
प्रस्तारे मित्र गायत्र्याः स्युः पादव्यक्तयः ॥ कति एकादिगुरवश्चाद्युकाति कस्युच्यतां ॥ एथ कृ जो मित्र गा २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

100

ते
लौ० ३ यस्याः प्रस्तारे चरणः स्यात्क्रमः कतिसंख्यः ॥ तथैकादिगुरवश्च कतित इत्येतत्पृथक्पृथगुच्यते ॥ लक्ष्ये लक्ष
णसमन्वयाहर्द्देति इहषड क्षरो गायत्री चरणोऽतः षडुक्तानां एकाद्येकोत्तराणां कानां व्यस्तानां च
न्यासः ६ ५ ४ ३ २ १ अत्रांत्यस्य षडंकस्य गुणाभावात् लब्धेन १ भक्ते लब्धं ६ अथाद्यतो
यपूर्वं ५ १ २ ३ ४ ५ ६ लब्धांकेन ६ गुणितः ३० छेदेन २ भक्ते लब्धं १५ अथ ततीयः ४ पूर्वा
केन १५ हतः ६० छेदेन ३ भक्ते लब्धं २० अनेन च तुर्थो हतः ६० हारेण ४ हृते लब्धं १५ अनेन पंचमः २
हतः ॥ ३० छेदेन ५ भक्ते ६ अनेनाद्य १ हतः ६ छेदेन ६ हृते लब्धं १ एवं क्रमेणैकगुरवो ६ द्विगुरवः १५ त्रि
गुरवः २० चतुर्गुरवः १५ पंचगुरवः ६ षड्गुरु रेकः इति मूलरूपान्यत्स्पष्टं ॥ ॥ अथैको लघुः ॥ बोध्यं ५
एवं मासामेकत्र्यां पादव्यक्तिमिति: ६४ एवं चतुश्चरणाक्षरसंख्यानकानुक्त विधिना विन्यस्य
कादिगुरुभेदाश्चानीय ॥ तेषामेकत्र्यं सैकं च लब्धा जाता गायत्री वृत्तसंख्या १६७७७२१६ एवमुक्ता
घुतिरुक्तेपर्यंतं छंदसां व्यक्तिमिति: ॥ अथ त्रिरत्न्येरस्मे देप्युदाहरणं रत्नेनाह ॥ एकद्व्यादिगु
मा॥ रवावलनमिति हो वृहि मे भूमि भर्तुर्हमेर म्येष्टमूरव चतुर विरञ्चिते श्लक्ष्णानाल्ला विनाले एकद्व्या

KKSU LIBRARY
RAMTEK
441 106
M-1674
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३६

दिसुतया मधुरकटुकषायाम्लकक्षारतिक्तैः एकस्मिन् षड्रसैः सुगंधे कृतिवद्व्यंजने यन्ति भेदाः॥ हे गणक
चतुरविरचितं श्लक्ष्णाक्षिः सुधादिना घोटनात् चिक्कणतराभिः शालाभिर्विशाले विपुले
अत एव रम्यमुविभर्तुराज्ञोष्टमुखैः ष्टौ मुखवातायुसंचारच्छिद्राणि यस्मिन्नुत नादृशो अष्टौ मुखवाउच्च
भूमयो यस्मिन् तादृशो वा हर्म्ये सौधे एकद्वित्र्यादिकल्पितासु मुखवासुपानिवहनानि तेषां मितिमा
नं ब्रूहि किंच एकस्मिन् व्यंजने एकद्वित्र्यादियुक्तामधुरकटुकषायाम्लकक्षारतिक्तैः षड्रसैः यन्ति भेदाः
कति स्युः तद्वदेति संबंधः न्यासः

८	७	६	५	४	३	२	१
१	२	३	४	५	६	७	८

एकाद्येकोत्तराइति स्फुटं लब्धांकास्तेषां न्यासः लब्धा वहन संख्याः

८	२८	५६	७०	५६	२८	८	१

एवं सर्वमुखवा वहने भेदाः २५५ विरस भेदोदाहरणे न्यासः

६	५	४	३	२	१
१	२	३	४	५	६

पूर्ववल्लब्धा यन्ति भेदाः

६	१५	२०	१५	६	१

योगः ६३ एकरसा षट् भेदाः द्विरसाः पंचदश भेदाः इत्यादि इति लीलावतीव्याख्याने मनोरंजने मिश्रव्यवहारः ॥ ६ ॥ अथ श्रेढीव्यवहार मा... सैकपदघ्नपदार्धमथैकाद्यंकयुतिः किल संकलिताख्या साद्वियुतेन पदेन विनि

फल

३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लि·३

घ्नीस्त्रिविहृता किल संकलितैक्यं ॥१२॥ अत्र संकलितानामेकानामंतिमोंकः पदमिति व्यवह्रि
यते एकसहितपदेन गुणितस्य यत्पदं तदर्धं किलेति निश्चये एकाद्यंकानां युतिर्भवति ए
तद्गुणितस्य संकलितमिति संज्ञा ॥ अथ संकलितस्यापि संकलितमाह ॥ सा द्वियुति साऽंक
युति द्वियुतेन पदेन गुणिता ततस्त्रिभिर्हृता सति संकलितैक्यं स्यात् ॥ अथ ॥ उदाहरणं ॥
एकादीनां नवांतानां पृथक्संकलितानि मे तेषां संकलितैक्यानि मे च क्षेत्रगणक ब्रूहि ॥१३॥ स्पष्टं

न्यासः

१	२	३	४	५	६	७	८	९

पदं सैकं १० तेन पदं ९ हतं ९० तदर्धं ४५ इदमेकादिन
वांतानां संकलितं सा अंकयुतिः ४५ द्वियुतेन पदेन ११ हता ४९५ त्रिभक्ता १६५ इदं संकलितैक्यं
१६५

१	३	६	१०	१५	२१	२८	३६	४५

संकलितानि ॥ तेषामैक्यानि

१	४	१०	२०	३५	५६	८४	१२०	१६५

सूत्रं ॥ द्विघ्नपदं कुयुतं त्रिभक्तं संकलितेन हतं कृतियोगः ॥ संकलि
तस्य कृतेः सममेकाद्यंकघनैक्यमुदाहृतमाद्यैः ॥ द्विघ्नपदमेकयुतं संकलितेन हतं त्रिभक्तं

वि२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ सन्दलितियोगो भवति ॥ एकादीनामंकानां ये घनास्तेषामैक्यं तु संकलितस्य कृतेः समं भव
वति संकलितवर्ग एव एकाद्यंकघन इत्यर्थः ॥ उदाहरणं ॥ ॥ तेषामेव च वर्गैक्यं घनैक्यं च
वद द्रुतं यदि संकलनामार्गे कुशलाय दितेमतिः ॥ एषामेकाद्यंकानां वर्गैक्यं घनैक्यं च वद
इत्यमुना प्रकारेण संकलनामार्गे तव मतिः प्रवीणतर्हि वद यदि संकलनामार्गे इति पाठोऽ
न्यः न्यासः १ २ ३ ४ ५ ६ ७ ८ ९ पदं ९ द्विघ्नं १८ रूपयुतं १९ संकलितेन ४५ हतं ८५५ ॥ त्रिविभ
क्तं २८५ एकादिनवांतानां वर्गाः ॥ १ ॥ ४ ॥ ९ ॥ १६ ॥ २५ ॥ ३६ ॥ ४९ ॥ ६४ ॥ ८१ एषामैक्यं २८५ अयं सं
५ कलितस्य कृतिः २०२५ एकादीनां नवांतानां घनाः ॥ १ ॥ ८ ॥ २७ ॥ ६४ ॥ १२५ ॥ ३४३ ॥ ५१२ ॥ ७२९ ए २१६
षामैक्यं २०२५ करणसूत्रं ॥ व्येकपदघ्नचयो मुखयुक्स्यादंत्यधनं मुखयुग्दलितं तत् ॥ मध्यध
नं पदसंगुणितं तत्सर्वधनं गणितं च तदुक्तं ॥ एकरहितपदेन गुणितो यश्चयः स मुखेन आदिधनेन
युक्तः सन् अंत्यधनं तद् अंत्यधनं आदिधनयुक् दलितं सत् मध्यधनं भवति ॥ तन्मध्यधनं पदसं ३
त्

१०५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰उ॰

आदिदिने यद्दत्तं धनं
गुणितं स सर्वधनं भवति। तदेतदुत्तरगुणिते निरुक्तं सर्वद्रव्यप्रमाणं कथितं॥ आदिदिने यद्दत्तं धनं
गुणितं स सर्वधनं भवति। तदेतदुत्तरगुणितं सर्वद्रव्यप्रमाणं कथितं॥ आदिदिने यद्दत्तं धनं
तदादिधनं तथा यदुत्तरमधिकं दत्तं स उत्तरः तथा यावद्दिवसपर्यंतं स गच्छ इति संज्ञा कृताः सेति॥ ए
वं मुखमादिवदनं चेति। तथा चये उत्तरश्चेति तथा गच्छपदं चेति पर्यायाः॥ उदाहरणं॥ आद्येदिने द्र नू४
म्मचतुष्टयं योदत्वा द्विजेभ्योनुदिनं प्रवृत्तः दातुं सखे पंचचयेन पक्षे द्रम्मा वद द्राक् कति तेन दत्ताः
॥ आद्येदिने यः द्रम्मचतुष्टयं द्विजेभ्यो दत्वा अनुदिनं पंचवृध्यानुप्रवृत्तः सः पंचदशदिनेषु कति द
त्तवानित्यर्थः पक्षः पंचदशदिनात्मकः पक्षस्तेद्दशपंचचेति कोशनात्॥
न्यासः पद १५ व्येकं १४ तेन गुणितश्चयः ५ जातं ७० मुखेन ४ युतं ७४ जातमंत्यधनं मुख ४
युक्तं ७८ दलितं जातं मध्यधनं ३९ तन्मध्यधनं ३९ पदेन गच्छेन १५ गुणितं जातं सर्वधनं ५८५
द्वितीयोदाहरणं॥ आदिस्सप्त चयः पंच गच्छोष्टौ यत्र तत्र मे मध्यांत्यधनसंख्यां वद सर्वधनं च किं॥ न्या
सः मुखं ७ उत्तरः ५ गच्छ ८ व्येकं ७ तेन गुणितः चयः ५ मुख ७ युक्तं ४२ जातमंत्यधनं॥ तदंत्य
धनं ४२ मुखं ७ युक्तं ४९ दलिते ४९/२ जातं मध्यधनं तन्मध्यधनं ४९/२ पदसंगुणं ३९२/२ छेदेन हृतं

चयस्य त्रैराशिकेनाप्येतत्सिद्धं २ क्रम ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰ उ॰
३८

तेसर्वधनं १९६ अत्रसमदिनगच्छेन्मध्यदिनाभावानप्रागपरदिनयोगार्धंमध्यदिनंभवितुमर्हतीत्य
तीतेरुपाय॥ सूत्रं॥ गच्छहृतेगणितेवदनंस्यात् व्येकपदघ्नचयार्धविहीने॥ गणितंनामश्रेढीफलं
गच्छेनहृतेसतियत्फलंतत्व्येकपदघ्नचयस्यार्धविगतःऊनःयस्मात्तद्व्येकंचतसदंचतदर्धहीनेक्री
येतद्वदनंभवति॥ उदाहरणं॥ पंचाधिकंशतंश्रेढीफलंसप्तपदंकिल॥ चयंत्रयंवयंवदनंवद न३
नंदन॥ श्रेढीफलंसर्वधनंशेषंस्पष्टं न्यासः॥ आदि० चय ३ गच्छ ७ गणित १०५ तद्गच्छेन ७ हृतंस विमो४
जातं १५ पद ७ व्येकं ६ तेनगुणितश्चयः ३ जातः १८ तदर्धं ९ तेनविहीनं पूर्वानीतंफलं १५ जातं ६
वदनं॥ सूत्रं॥ चयज्ञानार्थमाह॥ गच्छहृतंधनमादिविहीनंव्येकपदार्धहृतंप्रचयःस्यात्
धनंश्रेढीफलं॥ गच्छेनहृतेसतियत्फलंतदादिविहीनंकार्यं॥ ततःव्येकपदार्धहृतेसतिचयोभव
ति॥ प्रथमेति॥ बोधीमनुष्यःअनेनोक्तःप्रथमेअह्नादिनेनयोजनद्वयंगतः तदनु द्वितीयदि मग२
नादितःयोजनानामचयोस्तिरिपुनगरंसमरार्जेणअशीतिसप्ताहिकियाधावयोगतस्तद्ब्रूहिअ
थकिमर्थंगतइत्याह॥ अरीति॥ अरीणांनरीणांहरणार्थं॥ न्यासः॥ आदिः २ उत्तरः गच्छः ७ फलं ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰टु॰

८०ग छेनहृतंजातं १० आदिः २ अनेन विहीनं सम छेदार्थे न्यासः ८० २ जातो समहरो ८० १४
विहीनं सत जातं ७८ पदं ७ चयेकं ६ तदर्धं ३ तेन दैहृतं छेदं लवं च प ६६ वर्ग ६६ १ सवं॥
इगहतिः छेदव घनभक्ताः ६६ त्रिभिः ३ रपवर्तितः २२ जातं चयः
श्रढीफले ति उत्तरेण चयेन लोच २१ नाभ्यां च हतात् च यार्थवक्त्रयोरंतरवर्गेण युतात्
एनी स्रढीफलात् सर्वधनात् मूलं यास्यात् तच्च मुखोन चयखंडेन युक्तं चयेन हृतं फलं तत् गच्छ
मुदाहरंति इग्मीति १ न्यासः आदिः ३ उत्तरः ४ गच्छफलं २६० उत्तरेण २ गुणितं ७२० द्वाभ्यां
गुणितं ४८० चयः २ तदर्धं १ वक्त्रं ३ तदंतरं २ अस्य वर्गः ४ तेन युतं १४४४ अस्य मूलं ३८ मुखेन
ऊनं चयः २ खंडं १ तेन युक्तं ३६ ततः चयेन २ उद्धृतं १८ लब्धः गच्छः १८ करणसूत्रं॥
अथ गुणोत्तरे गणितमाह। विषमे गच्छे व्येके गुणकः स्याप्यः समेऽर्धिते वर्गः॥ गच्छक्षयांतमंत्याद्व्यस्त
गुणवर्गफलं चयतत् व्येके व्येकगुणोद्धृतमादिद्विगुणं स्याद्गुणोत्तरे गणितं॥ गच्छे विषमे सति गच्छे
कः कार्यः तस्मिन्नेके गुणक इति संज्ञा कार्या पश्चात्समे गच्छे सति॥ तदर्धं कार्यं तस्मिन्नर्धे वर्गइ
इति संज्ञा कार्या। एवं गच्छक्षयांतं यावच्छेदो निःशेषो भवति तावत्कार्यं॥ अंत्यात्व्यस्तं विपरीते

हु

107

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



स पंचाशच्च १०४८५७ द्रम्माः ६ पणाः ६ काकिण्यो २
वराटकाः ६ ॥ उदाहरणं ॥ आदिर्द्वयं सखे वृद्धिः प्रत्यहं त्रिगु
णोत्तरा ॥ गच्छः सप्त दिनं यत्र गणितं तत्र किं वद ॥ [illegible] ॥
न्यासः ॥ आदिर्द्वयं २ गुणोत्तरं ३ गच्छ ७ गच्छो विषमः ये
कः ६ गुणः अर्धितः ३ वर्गः येकः २ गुणः अर्धितः वर्गः
१ गुणोत्तरः ३ तद्वर्गः ९ त्रिगुणः २७ अस्य वर्गः ७२९ अ
यं त्रिगुणः गुणवर्गजं फलं जातं २१८७ ॥ ततश्चैकगुणि
तं २१८६ ॥ उद्धृतं २ एकः २ तेन लब्धं जातं १०९३ आ
दिगुणितं तदेव लब्धं सर्वधनं २१८६ लब्धं गणितं ॥ अथ रत्नसमानीय संख्यामाह ॥ पादाक्ष
र मिते गच्छे गुणवर्गफले चये द्विगुणे समरत्नानां संख्यानद्वर्गो वर्गवर्गश्च ॥ स्वस्वपदैर्नोयस्या
तन्मर्द्धसमानां च विषमाणां ॥ चरणाक्षरतुल्ये गच्छे द्विगुणे च चये कल्पिते सति ॥ पूर्ववद्धि

विषमाणं ३

गुणः ४

108

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृते १

४० प्रमेण छेद्यादिर्यदंतरोक्तप्रकारेण गुणवर्गफलं यत्स्यात्तत्समवृत्तानां संख्या स्यात् तस्याः व
र्गः वर्गवर्गोपि कार्यः ॥ तौ स्वस्वपदेनोक्तेन ॥ एवं समानां विषमाणां च वृत्तानां संख्या स्यात्
तदुक्तं भवति । चरणाक्षरतुल्यगच्छे विषमे गच्छे व्येक इत्यादिना गुणवर्गाः स्थाप्याः तत्रो
ते द्विगुणं निधाय गुणवर्गजं फलं यत्तदेव समवृत्तानां संख्या स्यात् ॥ अथ कस्याप्य तस्याः व
र्गसमवृत्तसंख्यो नो ऽर्धसमवृत्तसंख्या स्यात् समवृत्तसंख्या वर्गस्यापि वर्गः ॥ समवृत्तसंख्या स्या ५
वर्गेणोनो विषमसंख्या स्यादर्धत ॥ यस्य वृत्तो पिपादः लघुगुरुलक्षणेन स मा समवृत्ते स ६
यवृत्तं प्रथमन्तृतीयोतुल्यलक्षणो तदर्धसमं एकैकलक्षणानि सर्वाणि विषमवृत्तान्येव ॥ उ
समवृत्तादिलक्षणमुक्तं वृत्तरत्नाकरे ॥ अंघ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः
तच्छंदः शास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवेत् ॥ द्विती
यस्तूर्यवद्वृत्तं तदर्धसममुच्यते ॥ यस्य पादचतुष्केपि भिन्नं लक्ष्म परस्परं तदाहुर्विषमं वृत्तं

४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली०उ०

छंदः शास्त्रविशारदादिति ॥ समानामर्धतुल्यानां विषमाख्यं पृथक् पृथक् ॥ वृत्तानां वदमे संख्या
मनुष्टुप्छंदसि द्रुतं ॥ स्पष्टं न्यासः आदिः तुल्यो नरः २ गच्छ ८ अत्र गच्छसमोस्ति अतः समे अर्द्धि
वर्ग३ ते इति क्रिया समगच्छे ८ सति अर्द्धितः ४ वर्ग इति संज्ञा पुनः समे ४ अर्द्धिते वर्गः पुनरपि २ समेर्द्धिते १ व
र्गः अस्य प्रस्तारः ॥ अंत्याद्यस्तं तु गुणवर्गफलमित्यस्य क्रिया विषमे व्येके गुणः २ व. अस्य वर्गः ४ अस्या
पि वर्गः १६ पुनरपि अस्य वर्गः २५६ जाता समवृत्तसंख्या ॥ अस्याः २५६ वर्गः व. ६५५३६ स्वपदे
न २५६ ऊनः ६५२८० जातमर्धसमवृत्तसंख्या ६५२८० समवृत्तसंख्या २५६ अ व. स्याः वर्गः ६५५३६
वर्गः ४२९४९६७२९६ स्वपदेन ६५५३६ ऊनः ४२९४९०७७६० जाता विषमवृत्त गु. संख्या ४२९४९०७७६०
इति श्रीराममहत्त विरचिते लीलावत्युदाहरणे मनोरंजने श्रेढीव्यवहारः समाप्तः ॥ अथ क्षेत्रव्य
वहारो व्याख्यायते तत्र सूत्रं ॥ श्रीवरदमूर्तये नमः ॥ इष्टो बाहुर्यस्यां तत्स्याद्दिश्यां दिशीतरो बाहुः ॥
त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्तिता तज्ज्ञैः ॥ १ ॥ अस्यार्थः ॥ इष्टो बाहुर्लत्स्य दिश्यां बाहुलयायां दिशि
यदितरः बाहुः सा तज्ज्ञैः संख्यातज्ज्ञैः विद्वद्भिः त्र्यस्रे त्रिकोणे चतुरस्रक्षेत्रे कोटिः कीर्तिता ॥ तस्य योर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४१ गयदं कर्णदोः कर्णवर्गयोर्विवरात् मूलं कोटिः कोटिश्रुतिघ्नयोरंतरात्पदं बाहुः ४ भुजकोटिवर्ग
योर्योगस्तत्पदं मूलं स कर्णः त्र्यस्रके कर्णमानं भवति चतुरस्रेऽप्येवमेव तु भुजकर्णज्ञाने कोटिज्ञान
माह दोःकर्णवर्गयोर्विवरात् मूलं कोटिः भुजकर्णघ्नयोर्यद्विवरं अंतरं तस्मादानीतयन्मूलं सा कोटिः
कोटिकर्णज्ञाने भुजज्ञानमाह कोटिः श्रुतिघ्नयोरंतरात्पदं बाहुः ५ कोटिकर्णवर्गयोरंतरात्पदं मू
लं बाहुर्भवति तद्वर्गज्ञानं प्रकारांतरेणाह राश्योरंतरवर्गेण द्विघ्ने घाते युते तयोः वर्गयोगो भवेदे
वं तयोर्योगांतराहतिः ६ वर्गांतरं भवेदेवं ज्ञेयं सर्वत्र धीमता ७ राश्योः कोटिभुजयोर्घाते परस्प
रगुणने द्विघ्ने सति तयोरेव राश्योरंतरस्य विवरस्य यो वर्गस्तेन युते सति वर्गयोगो भवेत् वर्गविवर
माह एवमेव दोःकर्णयोर्योगस्यांतरेण दोःकर्णयोरेव विवरेण आहतिः ८ दोःकर्णयोगस्य गुण
नेन तद्वर्गांतरं दोःकर्णवर्गविवरं भवेत् तन्मूलं कोटिरित्यादि पूर्ववत् उदाहरणं कोटिश्चतुष्टयं
यत्र दोस्त्रयं तत्र का श्रुतिः कोटिदोःकर्णतः कोटिं श्रुतिभ्यां च भुजं वद १ यत्र त्र्यस्रे चतुष्टयं को ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टिः त्रयं भुजः तत्र श्रुतिः का कः कर्णः एवं दोः कर्णतः भुजकर्णाभ्यां कोटिवत् कोटिकर्णाभ्यां भु
जंवत् यथा कोटिभुजौ ४ ३ तयोः कृती १६ । ९ योगः २५ अस्य मूलं कर्णः ५ दोः कर्णौ ३ ५ अनयोः
कृती ९ २५ अनयोर्विवरं १६ अस्य मूलं ४ कोटिः ४ तथा कोटिश्रुती ४ ५ अनयोः कृती १६ । २५ अ
नयोर्विवरं ९ अस्य मूलं ३ भुजः ३ न्यासः राश्योः ३ ४ घातः १२ द्विघ्नः २४ राश्योः ३ ४ अंतरं १ अस्य
वर्गेण १ युतः २५ जातो वर्गयोगः २५ दोःकर्णयोः योगः ८ अनयोरंतरेण २ गुणितः १६ एतन्मूलं कोटिः ४
अथ [illegible]तरज्ञानमाह राश्योः ३ ४ योगः ७ अंतरेण १ गुणः ७ जातं वर्गांतरं । तथा भुजकर्णयोः ३ ५ य
था अनयोर्योगः ८ अंतरेण २ गुणः १६ जातं वर्गांतरं १६ अस्य मूलं ४ कोटिः । एवं कोटिकर्णयोरपि ४ ५
यथा । अनयोर्योगः ९ अंतरेण १ गुणः ९ जातं वर्गांतरं ९ अस्य मूलं भुजः ३ एवं कोटिकर्णयोः । अथा

न्युदाहरणं । सार्धत्रयमितो बाहुर्यत्र कोटिश्च
तावती तत्र कर्णप्रमाणं किं गणक ब्रूहि मे द्रुतं ।।
अस्यार्थः । यत्र क्षेत्रे बाहुः सार्धत्रयमितः सपाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

× द्विलब्धं यस्य दंतन्निकटं भवेत् किंभूतं मूलं गुणपदक्षुण्णछिद्रकं ×

४२ त्र्यंशः कोटिरपि सपादत्रयमिता न च करणप्रमाणं किं हे गणक द्रुतं मे ब्रूहि। यथान्यासः भुजः [३/४] [३/४]
कर्णस्यानयनार्थं छेदघ्न पश्चिन्निहतौ कोटिभुजयोः [१३/४] [१३/४] हतौ [१६९/१६] [१६९/१६] अनयो [२/४] [२/४]
र्योगः [३३८/१६] द्वाभ्यामपवर्तितः [१६९/८] अयं कर्णः करणीगतोमू [१६/१६] [१६] लाभावात् अ
स्यास न्नमूलानयनं त्र्यो र मूलदस्यार्थं आसन्नक्रियया पदं वर्गेण महतेष्टेन वधोच्छे
दांशयोर्हतात् पदं गुणपदक्षुण्ण छिद्र ले निकटं भवेत्। छेदांशयोर्वधात् महतेष्टेन वर्गेण ह
तात् इष्टवर्गगुणस्तस्य पदं तेन क्षुण्णेहतो यच्छित छेदस्तेन भक्तं तस्माल्लब्धमासन्नमूलं करणद्
त्यर्थः न्यासः छिदेंशौ [३३८/१६] द्वाभ्यामपवर्त्तः [१६९/८] छेदांशयोर्वधः १३५२ महतेष्टेन त्रो तस्य वर्गेण १००००



हतः १३५२०००० एतस्यासन्नपदं ३६७ गुणस्य १०००० यत्पदं १००
तेन छेदः ८ गुणः ८०० अनेन भक्ते लब्धमासन्नमूलं कर्णः [४६७/८००] अथ जात्य
त्र्यस्रमात् इष्टे भुजोस्माद्विगुणेष्टनिघ्नादिष्टस्य कृत्यैक [४६७/८००] वियुक्तयाप्तं
कोटिः पृथक् सेष्टगुणा भुजोना कर्णो भवेत्त्र्यस्रमिदं तु जात्यं इष्टाज्जात्यो ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰उ॰

भुजः द्विगुणं यदिष्टं ध्यादिष्टं तेन हतात्तस्मात् भुजात् इष्टेन जातो यो भुजः द्विगुणं यदिष्टं तदा एव पुनः क
इष्टस्य कृत्या वर्गेण भक्तात् यल्लब्धं सा कोटिः सैव कोटिः पृथक् स्थिता इष्टगुणा भुजोना कर्णो भवेत् इ
५३ दं तु जात्यत्र्यं अथ प्रकारान्तरमाह ॥ इष्टो भुजस्तत्कृतिरिष्टभक्ता द्विष्ठापि तेष्टोनयुतार्द्धिता वा ॥ तौ को
टिकर्णौ इति कोटितो वा बाहुश्रुती चाकरणीगते स्तः ॥ २ ॥ इष्टो ज्ञातो यो भुजः तस्य कृतिः इष्टभक्ता द्विस्था
पिता इष्टेनयुतोना ततोऽर्द्धिता तौ कोटिकर्णौ भवेतां इत्यनेन प्रकारेण कोटितोपि वा अकरणीगते भुज
कर्णौ स्तः उदाहरणं भुजे द्वादशके यौ यौ कोटिकर्णावनेकधा ॥ प्रकारद्वयतो ब्रूहि क्षिप्रं तौ तावकरणी
गतौ ॥ द्वादशाके भुजे अनेकधा यौ यौ कोटिकर्णौ भवेतां अकरणीगतौ प्रकाराभ्यां क्षिप्रं वद अथ ग



णितं इष्टः भुजः १२ इष्टेन २ द्विगुणेन ४ हतः ४८ अस्मादिष्टस्य २ कृत्या ४ एक १ वियु
क्तया ३ प्राप्तं १६ इयं कोटिः इष्ट २ गुणिता ३२ भुजेन १२ हीना अयं कर्णः २० एवमिष्ट
वशादानन्त्यं अथेति भुजः १२ तत्कृतिः १४४ इष्टः ४ भक्तः ३६ इष्टेन ४ ऊना ३२ युता ४०
अर्द्धिता १६।२० जातौ कोटिकर्णौ १६।२० कोटितो बाहुश्रुती यथा ॥ इष्टा कोटिः १६ त
त्कृतिः २५६ इष्टेन ८ भक्ता ३२ द्विस्थापिता ३२।३२ इष्टेन ८ ऊना २४ युता ४० अर्द्धि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपा १

३ एकेनपुत्रयोगेयस्या सासएकसुत्रे सुमिश्रणे संपदादित्वा क्वि पृथुत्रे निपाठः साधुः ×३

६३ ना ... एवंकोटिसकाशात् बाहुकर्णौ ॥ सूत्रं ॥ इष्टेन निघ्नाद्द्विगुणाच्च कर्णा दिष्टस्य कृत्यैकयुता
यदाप्तं कोटिर्भवेत्सा पृथगिष्टनिघ्नी तत्कर्णयोरंतरमत्रबाहुः ॥ द्विगुणात्कर्णात् इष्टेन गुणिता
त् एकयुतात् इष्टस्य कृत्या यदाप्तं सा कोटिर्भवति सैव कोटिः ॥ पृथक्स्थाप्य इष्टगुणात कर्णयोः तस्य इष्ट
गुणात्त्रय दंतरं सोत्र बाहुः ॥ उदाहरणं ॥ पंचाशीतिर्यत्र कर्णो यो यो वरूप गणक तो स्यातां कोटिभुजौ
तौ तौ वद कोविदसत्वरं ॥ पंचाशीतिमितकर्णयोः यो कोटिभुजौ अकलगणितो स्यातां ते को विदतो कोटिभु
जौ नीत्वा वद यथा कर्णः ८५ द्विगुणः १७० इष्टेन २ हतः ३४० अस्यात् इष्टस्य २ कृत्या ४ एकयुतया
५ भक्ते लब्धं कोटिः ६८ इयं इष्ट २ गुणा १३६ एतस्याः कर्णस्य च ॥ ८५ अंतरं बाहुः ५१ अथ प्रकारांतरेण
कर्णाद्भुजकोटी आह ॥ इष्टवर्गैकेन द्विघ्नः कर्णोऽथवा हृतः फलोनः श्रवणः कोटिः फलमिष्टगुणं भुजः
१ अथवा श्रावः ५ सांतरद्योतनाय कर्णो द्विगुणः सैकेनेष्टवर्गेण भक्तः तत्र लब्धं यत्फलं तेन ऊनः कर्णः
कोटिर्भवति फलं इष्टगुणं बाहुर्भवति यथा कर्णः ८५ द्विघ्नः १७० इष्टवर्गेण ४ सैकेन ५ भक्तः फलं ३४
अनेन श्रवणः ८५ ऊनः ५१ इयं कोटिः फलं ३४ इष्ट २ गुणं ६८ अयं भुजस्तत्र दोःकोट्योर्नाम भेद एव ६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰ ७



नस्वरूपभेदः ॥ अथ ज्ञानात् कोटिभुजकर्णानाह । इष्टयोराहतिर्द्विघ्नी कोटिर्वर्गान्तरं भुजः
कृतियोगस्तयोरेव कर्णश्चाकरणीगतः ॥ १ इष्टयोर्द्वयोराहतिः परस्परगुणनं द्विघ्नी
द्विगुणा सति कोटिः स्यात् वर्गान्तरं इष्टयोर्वर्गविवरं भुजः स्यात् तयोरेवेष्टयोः कृ
तियोगः अकरणीगतः कर्णो भवति ॥ उदाहरणं ॥ यैर्यैस्त्र्यस्रं भवेज्जात्यं कोटिदोःश्रव
णैः सखे त्रिभिस्त्र्य विदितांस्तांस्तान्वद क्षिप्रं विचक्षण ॥ १ हे सखे यैर्यैः कोटिदोःश्रवणैः जात्यं त्र्यस्रं
भवेत् अविदितान् नूतान् कोटिभुजकर्णान् त्रीन् ब्रूहि यथा इष्टौ १ । २ आहतिः २ द्विगुणा ४ इयं को
टिः ४ इष्टौ १ । २ वर्गौ १ । ४ अंतरं ३ भुजः इष्टौ १ । २ कृती १ । ४ योगः ५ कर्णः ५ इष्टयो २ । ३ राहतिः
६ द्विघ्नी १२ इयं कोटिः इष्टवर्गौ ४ । ९ तदंतरं भुजः ५ इष्टकृती ४ । ९ योगः १३ कर्णः इ



ष्टौ २ । ४ योराहतिः ८ द्विघ्नी १६ इयं कोटिः १६ इष्टवर्गौ ४ । १६ तदंतरं १२ अयं
भुजः १२ इष्टे २ । ४ कृती ४ । १६ योगः २० अयं कर्णः २० एवमनेकधा को
टिकर्णयोगे भुजे च ज्ञाते कोटिकर्णौ पृथगाह । वंशाग्रमूलान्तरभूमिवर्गो
वंशोद्धृतस्तेन पृथग्युतोनः वंशास्पदे दैर्घ्ये भवतः क्रमेण वंशस्य खंडे श्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४४ तिकोटिरूपे १ वंशाग्रमूलांतरभूमिवर्गो वंशास्यये अग्रमूले तयोरंतरे भूमिः भध्यभूमानं तद्वर्गः वंशो
द्धृतः वंशमानेन भक्तः लब्धेन पृथक्स्थितौ वंशो युतोनो विधेयो एकत्रयुतोन्यत्रहीनः तदर्धे श्रुतिकोटि
खंडे ३ रूपे भवतः ॥ उदाहरणं ॥ यदि समभुवि वेणुर्द्वित्रि ३२ हस्तप्रमाणो गणक पवनवेगादेकदेशे स भग्नः
भुवि नृप १६ मितहस्तेष्वंग लग्नं तदग्रं कथय कतिषु मूलादेष भग्नः करेषु १ अंगेत्यामंत्रणे स्युः
प्याटपांडुगेहेहे भ्योइतिकोनगाल ॥ हेगणक ॥ समभुवि रूढो द्वात्रिंशत् हस्तो वेणुः यदि वायुवेगादेकदेशे
स भग्नः तदग्रं वेणाग्रं वंशमूलात् षोडशहस्ते भुवि लग्नं तर्हि एषः वंशः भूतलात् कतिकरेषु भग्न इति कथय
यथा वंशाग्रमूलांतरं भूमिः १६ तद्वर्गः २५६ वंशेन ३२ भक्तः ८ फलेन वंशो युतोनो ४० । २४ तदर्धं २० । १२ ३२
श्रुतिकोटी २० । १२ अथ बाहुकर्णयोगे कोटौ च ज्ञाते बाहुकरणयोः पृथक्करणमाह ॥ स्तंभस्य वर्गोऽहिबिलांतरेण भक्तः फलं व्यालबिलांतरालात् ।
शोध्यं तदर्धप्रमितैः करैः स्यात् बिलाग्रतो व्यालकलापियोगः ॥ १ ॥ स्तंभस्य वर्गः अहिबिलयोर्यन्मध्यभूमानं तेन भक्तः तत् फलं व्यालबिलांतरालाच्छोध्यं शोधितं यच्छे
षं तदर्धमितैः हस्तैर्बिलाग्रतो व्यालकलापियोगो भवति ॥ उदाहरणं ॥ अस्ति स्तंभतले बिलं तदुपरि क्रीडाशिखंडी स्थितः स्तंभे हस्तनवोच्छ्रिते त्रिगुणितस्तंभप्रमाणांतरे दृष्ट्वाहिं बिलमाव्रजंतमपतत्तिर्यक् स तस्योप ४४
न १

ली॰उ॰ तयो१

रि क्षिप्र ब्रूहि बिलात्कति मितैः साम्येन गत्योर्युतिः ॥१ स्तंभतले बिलमस्ति तदुपरि स्तंभोपरिभागे नवह
स्तोच्चे स्तंभे क्रीडामयूरः स्थितः समयूरस्त्रिगुणितस्तंभप्रमाणं तटे त्र्यागच्छंतं सर्पं दृष्ट्वा तिर्यक् कर्णमार्गे
णतस्योपरि अपतत् ॥ बिलात्साम्येन तयोर्गतियोगः क्षिप्रं ब्रूहि ॥ यथा स्तंभस्य ९ वर्गः ८१ अहिबिलांतरे



ण २७ भक्ते फलं ३ अहिबिलांतरालात् २७ शोधितं २४ तदर्धं १२ हस्तेषु बिलात्सर्पशिखि
योगः १२ अयं भुजः १२ ॥ २७ एतस्मिन्क्षेत्रे द्वियान् १२ भुजस्तर्हि शेषः १५ कर्णः १५ कोटिकर्णांत
रे भुजे च ज्ञाते कोटिकर्णयोर्वा ॥ भुजाद्वर्गिता कोटिकर्णांतराप्तं द्विधा को
टिकर्णांतरेणोनयुक्तं तदर्धे कृते स्तः कोटिकर्णौ भवेतामिदं धीमतावेत्य
सर्वत्र योज्यं ॥१ वर्गितात् वर्गीकृतात् भुजात्कोटिकर्णांतरेण भक्ते यदाप्तं
तद्द्विस्थाप्य कोटिकर्णांतरेणोनयुक्तं विधाय तदर्धे कोटिकर्णौ भवेतां
धीमता इदमेव सर्वत्र योज्यं ॥ सखे पद्मतन्मज्जनस्थानमध्यं भुजः कोटिकर्णांतरं पद्मदृश्यं नलः कोटि
रेतन्मितं स्याद्यतो ब्रोवदैवं समानीयपानीयमानं ॥२ पद्मस्य पद्ममज्जनस्थानस्य पद्मध्यं स भुजः ॥ ॥

१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

118

४५ पद्मस्य हन्त्रयो भागः कोटिकर्णान्तरं जलमध्यगतः पद्मनालकोटिः यतो जलमेतन्निमितं कोटितुल्यं स्यात् हे
सखे पानीयमानसमानीयवद उदाहरणं चक्रौंचाकुलितसलिले क्वापि हृष्टे तडागे तोयादूर्ध्वं कमलकलि



काग्रं वितस्तिप्रमाणं मंदं मंदं चलि तं समनिलेनाहतं हस्तयुग्मे तस्मिन्मग्नं
गणक गणय क्षिप्रमंबुप्रमाणं ॥ १ ॥ क्वापि तडागे कमलकलिकाग्रं तोया
दूर्ध्वं वितस्तिप्रमाणं हृष्टं किंविशि ष्टे तडागे चक्रक्रौंचाकुलितसलिले त
तोवायुनाहतं मंदं मंदं चलितं स स्मिन्तडागे करयुगलमग्नं हे गणक दी
घ्रं जलमानं वद यथा भुजः २ वर्गि तः ४ कोटिकर्णांतरेण २ भक्तः छेदं लवं च प
रिवर्त्येति विधिना आप्त ८ द्विधा हृ तं ६ ८ कोटिकर्णांतरेण २ उनयुतं तदर्थं
समछेदे १६/२ २/२ उनः १५/२ युतः १७/२ तदर्धं १५/४ १७/४ जातौ कोटिकर्णौ कोटिरेव
जलमानं अथ कोट्या भुजेच दृष्टे षो डानार्धसूत्रं द्विनिघ्नतालो च्छ्रिसंयुतं यत्स
रोंतरे तेन विभाजितायाः तालोच्छ्रितस्तालसरों तरध्याद् ड्डीयमानं खलु उच्चतेन ततः ५ यत्सरोंतरं सरसोवा
थास्तीरस्य जलाशयस्य च मध्यमानं तद्विनिघ्नतालोच्छ्रितसंयुतं कार्यं द्विगुणं यत्तालोच्चतामानं तेन ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली०उ०

ग्रं

सहितं तालसरोंतरघ्नात् तालवापीमध्यभूमानगुणितायाः तालोच्छ्रितायास्तेन द्विनिघ्नतालोच्छ्रितियुतं ताल
सरोंतरेण भक्तः यल्लभ्यते तदुड्डीयमाने खलु कपेस्तालादूर्ध्वगतिमानमित्यर्थः ॥ अथोदाहरणं ॥ वृक्षा
द्धस्तशतोच्छ्रयाच्छतयुगे वापीं कपिः कोप्यगादुत्तीर्याथपरो द्रुतं श्रुतिपथात्प्रोड्डीय किंचिद्द्रुमात् जातैवं सम
तानयोर्यदि गतावुड्डीयमानं कियद्विद्वंश्चेत्सुपरिश्रमोस्ति गणिते क्षिप्रं तदाचक्ष्व मे ॥ १ ॥ कोपि कपिर्वानरः ह
स्तशतोच्चतालादुत्तीर्य हस्तशतद्वये वर्तमानां वापीं अगात् ॥ अथान्यो वानरो द्रुमात्तस्मादेव तालात् किंचि
दुड्डीय श्रुतिपथात् कर्णसूत्रमार्गात् कर्णसूत्रमार्गेणाश्रित्य द्रुतं वापीं गतः एवं सति तयोः कपयोर्यदि गतौ
समता जाता तर्हि उड्डीयमाने मानं कियत् हे विद्वन् चेद्गणिते तस्य सुतरां परिश्रमोस्ति तत् क्षिप्रं मे आच
क्ष्व वद ॥ न्यासः तालः १०० सरोंतरं २०० अनयोर्घातः २०००० द्विनिघ्नतालोच्छ्रित्या ४०० भक्तं सरों
तरं २०० द्विनिघ्नतालोच्छ्रित्या २०० संयुतं ४०० अनेन तालसरोंतरं २०० हतात् तालोच्छ्रिति २०००० भ
क्तो लब्धमुड्डीयमानं ५० कोटिः १५० भुजः २०० कर्णः २५० अथ कर्णभुजकोटियोगे च ज्ञाते भुजको
ट्योः पृथक् कर्णमाह ॥ कर्णस्य वर्गाद्द्विगुणाद्विशोध्यो योगः कोटियोगः स्वगुणोऽस्य मूलं योगो द्विधा

१२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४६

मूलविहीनयुक्तः स्यातां तदर्धे भुजकोटिमाने १ द्विगुणात्
कर्णस्य वर्गात् स्वगुणः स्वेनगुणितात् दोः कोटियोगो विशो-
ध्यः ॥ अस्य शोधितशेषस्य मूलं कार्यमिति शेषः योगो दोः
कोटियोगो द्विधा स्थाप्यः मूलविहीनयुक्तः कार्यः मूलयत्नेना-
नीतं तेनैकत्र हीनोन्यत्र युक्तः कार्यः तयोरर्धे भुजकोटिमाने
स्यातां ॥ उदाहरणं ॥ ॥ दशसप्ताधिकः कर्णस्त्र्यधिकाविं-
शतिः सखे ॥ भुजकोटियुतिर्यत्र तत्र ते मे पृथग्वद १ हे सखे
यत्र कर्णः सप्तदश भुजकोटियोगस्त्रयोविंशतिः तत्र ते भु-
जकोटी पृथक् पृथक् त्वं मे वद कर्णस्य वर्गः २८९
द्विगुणः ५७८ अस्मात् दोः कोटियोगः २३ स्व-
गुणः ५२९ विशोध्यः ४९ अस्य मूलं ७ अने-
न दोः कोटियोगः २३ हीनयुक्तः १६ ३० तदर्धे



४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लीःउ

८ १५ इमे भुजकोटी लंबलंबो भयथाश्च भूखंडज्ञानमाह ॥ अन्योन्यमूलाग्रगसूत्रयोगाद्वेण्वोर्वधे योग
हृते च लंबः। वंशौ स्वयोगेन हृतावभीष्टभूघ्नौ च लंबोभयतः कुखंडे ॥ १ ॥ वेण्वोर्वंशद्वयस्य वधे परस्प
रगुणने योगहृते वेणुयोगेन हृते सति अन्योन्यमूलाग्रगसूत्रयोगात् अन्योन्यस्य मूले अग्रे च गच्छ
तस्ते अन्योन्यमूलाग्रे ये सूत्रे तयोर्योगः संबंधः तस्मादारभ्य लंबः भूपर्यंतं लंबसूत्रमानं भवति
अयंभावः एकस्य वंशाग्रान्नयादारभ्य परस्य वंशस्य वंशस्य मूलपर्यंतं सूत्रं पातनीयं एवमन्यस्याग्र
मारभ्य पूर्वस्य मूलपर्यंतं सूत्रं पातनीयं एवं कृते उभे अपि सूत्रे यत्र मिलिते भवतः स सूत्रयोगस्तमा
रभ्य लंबो भवतीति किंच वंशौ अभीष्टभूघ्नौ स्वेष्टभूमानेन गुणितौ स्वयोगेन वंश
द्वयसंख्यैक्येन हृतौ संतौ लंबोभयतः लंबस्य पार्श्वयोः कुखंडे भूभागौ भवतः अत्र वे
ण्वादिना वेण्वादिगतमानं गृह्यते ॥ उदाहरणं ॥ पंचदशदशकरोच्छ्रयवे
ण्वोरज्ञातमध्यभूमिकयोः इतरेतरमूलाग्रसूत्रयुते लंबमाचक्ष्व ॥ १ ॥ पंचदशदशकरोच्च
दशकरोच्छ्रययोः वंशयोः अविदितमध्यभूभागयोः इतरेतरमूलाग्रगसूत्रयुतपरस्प
रस्य मूलाग्रस्थितसूत्रद्वययोगात् लंबमध्यो भूपर्यंतं मानं वद ॥ पूर्वस्माद् उभयतः कुखं

न७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४७ उद्देशस्त्र अनुवर्त्ततेन्यासः ॥ यथावेध्वाः १५ । १० वधः १५० वंत्रायोगेन २५ हृतः लब्धं सूत्रयोगादव
लंबः ६ वंत्रौ १५ । १० अभीष्टभू ५ हतौ ७५ । ५० वंत्रायोगेन २५ भक्तौ लब्धे लंबो भवेतां वंत्रापर्यंत
भूखंडे ३ । २ एवमिष्टवशात्तनसे ॥ इदंत्रैराशिकादपि भवति ॥ तथा चानुपातः ॥ यदि भूमितुल्ये भुजे
५ वेत्राः १० कोटिः तदा भूखंडेन २ किमिति ॥ अत्र भूखंडेन वंत्राः गुणितः भुजेन भक्तः लंब एव प्र
त्र प्रमाणं ५ इच्छा २ फलं १० प्रमाणमिच्छा चेति हृते लब्धो लंबः ६ पुनरन्यत्रापि प्रमाणं ५ इच्छा
२ फलं १५ अत्रापि तथैव हृते लब्धः लंबः स एव ॥ यदि भूरेखा १० तदाप्येत तुल्ये अत्रापि लब्धः
स एव लंबः ॥ एवमन्यत्रापि १० । १५३४ प्रमाणमिच्छा चेति ६ हृते लंबः स एव वंत्राः १० कोटिस्तत
भूखंडे ६ किमिति प्रमाण १० फल १० इच्छा ६ भुजे २ ॥ अथ क्षेत्रा भावे सूत्र ॥ धृष्टोद्दिष्टभुजं क्षे
त्रं यत्रैकबाहुतः स्वल्पा ॥ तदितरभुजयुतिरथवा तुल्या ज्ञेयं तदक्षेत्रं ॥ १ ॥ धृष्टेनकेन चित् ऋजुभुजक्षे



त्रमुद्दिष्टं यत्र एकबाहुः तदितरभुजयुतिः स्वल्पा तुल्या वा स्यात्त
दक्षेत्रं ॥ उदाहरणं ॥ चतुरस्रे त्रि ३ षट् ६ द्वि २ कर्णः १२ भुजास्ये ४७

123

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰उ॰

स्त्रे त्रि २ ष ६ ११ ५ व ९ ॥ उद्दिष्टा यत्र धृष्टेन तद्‌क्षेत्रं न निर्दिष्टं चोत ॥ १ ॥ यत्र चतुरस्त्रे क्षेत्रे द्वि षट् त्र्यर्काः
२ ६ २ १२ अस्मे क्षेत्रे त्रिषट्नव २ ६ ९ भुजा उद्दिष्टा तत्क्षेत्रं अत्र ऋजु भुजस्याते बालाक्रांवि
न्यस्या अस्योपपत्तिर्दृश्या नोया ॥ अथ त्रिभुज क्षेत्रे लंबाबाधाज्ञानार्थं [illegible] मार्याद्वयं ॥ त्रिभुजेभु
जयोर्योगस्तदंतरगुणो भुवा हृतो लब्ध्या ॥ द्विष्टा भूरूनयुता दलिता बाधे तयोः स्यातां ॥ १ ॥ स्वा
बाधा भुजकृत्योरंतरमूलं प्रजायते लंबः ॥ लंबगुणं भूम्यर्धं स्पष्टं त्रिभुजे फलं भवति ॥ २ ॥ त्रिभुजे
क्षेत्रे भुजयोर्योगः तदंतरगुणो भुजयोरंतरगुणितो भुवा हृतः कार्यः ॥ त्रिकोणे धो मार्गे तिर्य
क्‌सूत्रं भूत्वा व्द्वाख्यं तस्य लब्ध्याफलेन भूर्द्विस्थापिता सति ऊनयुता कार्या सा दलिता अर्धिता आ
बाधे लंबो भय पार्श्वयो भूमाने स्यातां ॥ स्वाबाधा भुजयोर्ये कृती तयोर्यदंतरं तन्मूलं लंबो जाय
ते भूमेरर्धं लंबगुणितं सत् त्रिकोणस्य स्पष्टं फलं भवति उदाहरणं ॥ क्षेत्रे मही मनुमिता त्रिभु
जे भुजौ तु यत्र त्रयोदशतिथिप्रमितौ च यस्य ॥ तत्रावलंबकमितिं कथयावबाधे क्षिप्रं तथा च स
मकोष्ठमितिं फलाख्यं ॥ १ ॥ यत्र त्रिभुजे क्षेत्रे मही भूः चतुर्दश ॥ यत्र त्रयोदश तिथिप्रमितौ भुजौ

वर्गे ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४८

तत्रक्षेत्रे लंबमवधे आबाधे फलाख्यां समकोष्ठमितिं क्षेत्रफलं च कथयेस्तर्थः । यथा भुजयो १३ । १५
योगः २८ तदंतरेण २ गुणितः ५६ भुवो १४ हृतो लब्धं ४ अनेन भू १४ ऊना १० युता १८ दलिता ५ । ९ इमे आ
बाधे स्वाबाधाभुजो ५ । १३ तत्कृती २५ । १६९ तदंतरं १४४ मूलं १२ अयं लंबः अन्यत्राबाधाभुजौ ९
१५ तत्कृती ८१ । २२५ तदंतरं १४४ तन्मूलं लंबः स एव १२ भूमेः १४ अर्द्धं ७ लंबेन १२ गुणं ८४ इदं क्षेत्रफ
लं भुजौ १० । १७ अभिन्नोकोदाहरणमुक्त्वा भिन्नोकोदाहरणे ना । दशसप्तदशप्रमितौ भुजौ त्रिभुजे य
त्र नवप्रमा मही । अवधे वदलंबकं तथा गणितं गणितकाशु नैपुणं । यत्र त्रिभुजे भुजौ १० । १७ मही
९ तत्र लंबकं अवधे वद लंबकं गणितं फलं च हे गणितक गणितकुशल त्वं शीघ्रमेव वद । यथा भुजयोर्यो
गः २७ तदंतरेण ७ गुणितः १८९ भुवा ९ हृतः लब्धिः २१ अनया भू ९ ऊना न भवतीति भूरेव फला २१ द
पनीयशेषं १२ तदर्द्धं ६ ऋणगता बाधा ६ लब्ध्या २१ भू ९ युता ३० तदर्द्धं १५ ॥
द्वितीयाबाधा स्वाबाधाभुजो ६ । १० तत्कृती ३६ । १०० तदंतरं ६४ तस्य मूलं ८ लं
बः स्वाबाधाभुजो १५ । १७ तत्कृती २२५ । २८९ तदंतर ६४ तन्मूलं ८ स एव लंबः
भूम्यर्द्धं ९/२ लंब ८ गुणं ७२/२ छेदेन भक्तं ३६ क्षेत्रफलं । अथ प्रकारांतरेण चतुर्भु



४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...फलं त्रिभुजफलं चाह ॥ सर्वदोर्युतिदलं चतुस्थितं बाहुभिर्विरहितं च तद्वधात् ॥ मूलमस्फुटफलं चतुर्भुजे
स्पष्टमेवमुदितं त्रिबाहुके ॥ १ सर्वदोर्युतिदलं ॥ सर्वेषां दोषां भुजानां युतिर्योगस्तस्य दलमर्द्धं चतुस्थितं स
त् बाहुभिर्भुजैर्विरहितं कार्यं ॥ तद्धति चतुस्थित बाहुहीन सर्वदोर्युतिदलस्य हतेः परस्परगुणनात् तस्य यन्मूलं
तस्य चतुर्भुजे अस्फुटं फलं भवति ॥ त्रिभुजे तत्स्पष्टमेव फलमुदितं ॥ उदाहरणं ॥ भूमिश्चतुर्दशमितामु



खमंकसंख्यं बाहू त्रयोदशदिवाकरसंमितौ च लंबो
पि यत्र रविसंख्यक एव तत्र क्षेत्रे फलं कथय तत्कथि
तं यदाद्यैः ॥ १ यत्र भुवि रधस्तलसूत्रं चतुर्दशमुखं
सर्वसूत्रं नवमितं बाहु दक्षिणोत्तरसूत्रे १३ । १२ रवि
मितो लंबः १२ क्षेत्रं यदाद्यैराचार्यैः फलमुक्तं तत्क
थय ॥ सर्वभुजाः १४ । १३ । ९ । १२ तद्युतिः ४८ तद
लं २४ चतुस्थितं बाहुभिर्हीनं १० । ११ । १५ । १२ तद्धतिः
१९८०० तदासन्नमूलं १४१ इदमस्पष्टफलं वस्तुतस्तु लंबेन निघ्नं कुमुखैक्यखं

मितं ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰ उ॰ ४९

१खंडं २२
२३

।मितिरीस्यास मायातिन्यासः कु १४ मुख ६ कुमुखैवेक्यं लंबेन १२ हतं २५६ खंडं २ २६ छेदेन भक्तं
१३८ द्वंद्वा वास्तवफलं अथ पूर्वोदाहृतस्य त्रिभुजस्य न्यासः

त्रिभुजे यथा सर्वदोष्णं
१४ १३ १५ युतिः ४२ तद्दलं २१ चतुः स्थितमित्स कृत्वा त्रिभुजे क्षेपि चतुर्द्ध स्थाप्य वा
भूमिः त्रिभुजस्यलेषु बाहुहीनं ७ ८ ६ २१ तद्धति ७०५६ तन्मूलं ८४ द्वंद्वं त्रिभुजे स्पष्टफ
लं चतुर्भुजस्यानियममाह चतुर्भुजस्यानियतो हि कर्णौ कथं ततोऽस्मिन्नियतं फलं स्यात् प्रसाधि
तौ यच्छ्रवणौ यदाद्यैः स्वकल्पितौ वावितरत्र न स्तः १ तेष्वेव बाहुष्वपरौ च कर्णौ वनेकधा क्षेत्रफलं त
तश्च २ लंबयोः कर्णयोर्वैकम निर्दिश्य परान्कथं ३ प्रच्छत्यनियतत्वे पि नियतं चापि तत्कथं ३
सप्रच्छकः पिशाचो वा वक्ता नितरां ततः योनवेत्ति चतुर्बाहुक्षेत्रे स्यानियतां स्थितिं ४ चतुर्भुजे
स्य कर्णौ प्रतितो न ततोऽस्मिन् चतुर्भुजे नियतं फलं कथं स्यात् आद्ये छ्रवणौ चतुर्भुज कर्णौ यत्र
साधितौ ताववेतरत्र न भवतः तेष्वेव बाहुषु संकोचविकाराभ्यां अपरौ कर्णौ भवतः ततः क्षेत्रफ
लं कर्णभेदादनेकधा भवति तदेव दर्शयति चतुर्भुजे हीति स्पष्टं लंबयोरिति लंबयोः कर्णे ४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽर्थं क्रमनिर्दिष्टयापरात्कथं पृच्छति। अनियतत्वेपि नियतं न स्यात्लंबः पृच्छति स्तिस्र एककोणात्पि नि
तरां पितमाचः॥ यश्चतुर्भुजस्यानियतत्वं स्थितिं वद॥ अथ तुल्यकर्णं तुल्यचतुर्भुजस्य तथा तुल्यक
र्णतुल्यचतुर्भुजास्यायतचतुर्भुजयोः फलमाह॥ इष्टाश्रुतिरतुल्यचतुर्भुजस्य कल्प्या तत्वर्गवि
वर्जितायाः चतुर्गुणबाहुकृतेस्तदीयमूलं द्वितीयः श्रवणप्रमाणं॥१॥ तुल्यचतुर्भुजस्य इष्टाश्रु
तिरेकः कर्णः कल्प्यः अथातः बाहुचतुर्भुजवर्गः चतुर्गुणस्तद्वर्गचतुर्गुणात् इष्टश्रुतिवर्गहीनात्का
र्यात्तदीयं मूलं द्वितीयकर्णप्रमाणं॥ अतुल्यकर्णाभिहतिर्द्विभक्ता फलं स्फुटं तुल्यचतुर्भुजस्यात्
१ एवमानीयतयोरतुल्यकर्णयोरभिहतिर्द्वाभ्यां भक्ता सती तुल्यचतुर्भुजे अतुल्यकर्णे स्फुटं फलं
भवति एवमतुल्यकर्णस्योक्ता तुल्यकर्णयोरा॥ समश्रुतौ तुल्यचतुर्भुजे च तथायते तद्भुजकोटि
घातः १ समकर्णे तुल्यचतुर्भुजे तथायते दीर्घसमकर्णे चतुर्भुजे तद्भुजकोटिघाताएव फलं। फले
प्रकारांतरमाह चतुर्भुजेन्यत्रसमानलंबे लंबेन निघ्नं कुमुखैक्यखंडं १ अन्यत्रसमानलंबे चतुर्भु
जे लंबेन हतं कुमुखैक्यखंडं भूमिवदनैक्यखंडं फलं भवति। उदाहरणं॥ क्षेत्रस्य पंचकृतितुल्य चतुर्भु

128

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५० अस्य कर्णे तत्र च गणितं गणक प्रचक्ष्व । तुल्यश्रुतेश्च खलु तत्र च तथायतस्य यद्विस्तृतीरसमिता ष्टमितं
च दैर्घ्यं ॥ पंचविंशतिमिति चतुर्भुजस्य क्षेत्रस्य कर्णौ गणितं फलं हे गणक प्रचक्ष्व च पुनः तुल्यश्रुतेरपि
आ गणितं प्रचक्ष्व । तथायतस्य यद्विस्तृतिरसमिता अष्टमितं च दैर्घ्यं प्रचक्ष्व ॥ अथ प्रथमक्षेत्रस्योदाह
रणे न्यासः भुजौ २५ २५ तत्कृत्योः ६२५ । ६२५ योगः १२५० जाता अकरणीगताश्रुतिः उभयत्र तुल्यै



व वर्गः १२५० तद्भुजकोटिघातइतिरीत्या गणितं च ६२५ अत्र त्रिंशत्कर्णः कल्प्यः इष्टश्रु ति
रितिश्लोकेनइष्टस्य ३० वर्गः ९०० पुनः बाहुः २५ वर्गः ६२५ चतुर्गुणः २५०० एतन्मध्ये इष्टस्य
३० वर्गः ९०० न्यूनः १६०० मूलं ४० जातो द्वितीयः कर्णः ॥ अस्योपरिष्टमानीतं ४० कर्णस्य ४०
वर्गः १६०० भुजस्य वर्गः ६२५ वेदहतः २५०० अनयोरन्तरं ९०० मूलं ३० स एव कर्णः ३० अ



थातुल्यकर्णौ ३० ४० अनयोराहतिः १२०० अस्यार्धं ६०० जातं क्षेत्र
फलं ॥ अथ चतुर्दशमितामेकां श्रुतिं प्रकल्प्य १४ वर्गः १९६ भुजव
र्गः ६२५ चतुर्गुणः २५०० इष्ट ॥ ॥ वर्गेण हीनः २३०४ अस्य मूलं
४८ जातो द्वितीयः कर्णः ॥ अतुल्यकर्णयोः १४ ४८ राहतिः ६७२



५०

129

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॰उ॰

द्विभक्ता ३२।६।३।दं स्फुटफलं ॥ अथ आयतस्या चतुर्भुजस्य यद्विस्तृतिः रसमिता ६ अष्टमितो दैर्घ्यं ८ तत्र हसोरिति ॥ तयोर्भुजकोट्योः ८।६ कृतिः ३६।६४ योगः १०० अस्मान्मूलं १० अयत्रापि तुल्यः कर्णः १०।१० भुजः ८ कोटिः ६ अनयोर्घातः ४८ क्षेत्रफलं ॥ क्षेत्रस्य यस्य वदनं मदनारितुल्यं विश्वंभरा द्विगुणि

तेन मुखेन तुल्या ॥ बाहू त्रयोदश नखप्रमितौ च लंबः सूर्यैर्मितश्च गणितज्ञ गणक प्रचक्ष्व ॥ १ ॥ यस्य क्षेत्रस्य वदनं मदनारितुल्यं ११ द्विगुणितं तेन वदनेन २२ तुल्या विश्वंभरा भूः द्वौ बाहू त्रयोदश नखप्रमितौ १३।२० यत्र रविसंख्यकः लंबः १२ तच्च फलं किं ॥ उदाहरणं ॥ सर्वदोः २२।११।१३।२० युतिः ६६ दलं ३३

५१ चतुःस्थितं २२ । २२ २२ २२ बाहुभिः १२ ११ २२ २० क्रमेण विरहितं २० । २२ ११ १२ एतेषां परस्परगुणनं
६२९२० अस्य मूलं किंचिदूनमेकपंचाशन्मितं २५१ इदं फलं वास्तवं न ॥ वास्तवं तु लंबेन निघ्नं कुमुखैक्यखं
डमिति कु २२ मुखं ११ ऐक्यं ३३ खंडं ३३ लंबेन १२ निघ्नं अंशाहति रित्यादिना अंशयोः १२ ३३ / २ २ गुण
नं ३९६ छेदयोः १२ वधः अनेन भक्तं जातं सूक्ष्मफलं १९८ अथवा क्षेत्रस्य ॥ ॥ ॥
त्रेण५ ॥ खंडत्रयं एतेषां फलानयनं ॥ प्रथमे लंबगुणे त्रिस्रलंबेन भूमिगुणं ६० अर्धं ३० फलं द्वितीये भुजको
टी ६ १२ घातः ७२ फलं तृतीये लंबगुणेति भूमि १६ लंब १२ गुणं १९२ अर्धं ९६ जातं फलं एतेषां ३० ७२
९६ ऐक्यं १९८ जातं तदेव फलं सूक्ष्मं ॥ अन्यदुदाहरणं ॥ पंचाशदेकसहितावदनं यदीयं भूः पंचसप्तति
मिता प्रमिताष्टषष्ट्या सव्यो भुजो द्विगुणविंशतिसंमितोन्यस्तस्मिन् फले श्रवणलंबमिती प्रचक्ष्व १
यदीयं वदनं एकसहितापंचाशत् ५१ भूः पंचसप्तति ७५ मिता अष्टषष्ट्या मितः ६८
सव्यो भुजः द्विगुणविंशति ४० मितोन्यो भुजः तस्मिन् क्षेत्रे फलं प्रचक्ष्व न्यासः
श्रवणलंबमितिं प्रचक्ष्व तथा दर्शनं चतुर्भुजे ॥ अस्योदाहरणं अत्र लंबे ५१

१३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथात्रैवकर्णान्यतरज्ञानेनियतभावेनफलज्ञानेचलंबकर्णान्यतरज्ञानस्यकारणत्वेत्याह ॥ त्रुटिः पंक्तिः ॥ १ ×

ली॰उ॰

अतीनोज्ञानार्थंसूत्रं ॥ ज्ञातेऽवलंबेश्रवणेः अतोतुलंबः फलं स्यान्नियतंहितत्र ॥ १ लंबेज्ञातेसतिश्र
वणोपिज्ञायतेतत्रफलंनियतंभवति ॥ यत्रश्रवणः नज्ञातः लंबोपितत्रनज्ञायते ॥ अत्रकर्णस्यअ
नियतत्वात्लंबोपिअनियतः ॥ लंबज्ञानायसूत्रं ॥ चतुर्भुजांतस्त्रिभुजेचलंबः प्राग्वद्भुजौकर्ण
२४ भुजौमहीभूः ॥ चतुर्भुजांतर्वर्तिनि त्रिभुजेतिकरणंअथचतुर्भुजंभुजंप्रकल्प्यपृथ्वीभूमकल्प्यत्रि
भुजेभुजयोर्योगः इत्यादिनाफलंलंबअंतयः साध्याः ॥ अत्रक्षेत्रेसव्यभुजायाद्दक्षिणभुजमूलगा
कल्पितः मीष्टकर्णः सप्तसप्ततिमितः ७७ तत्रअसोकर्णः सएवभुजः ७७ सव्यभुजः ६८ द्वितीयभुजः ६८ भूः
सैव ७५ तथाक्षेत्रदर्शनंत्रिभुजेति ॥ भुजयोः ६८ ७७ योगः १४५ अंतरं ९ गुणः १३०५ भुवा ७५ हृतः



न नि: शेषोंजायतेइतिह्रत्वाहरः १३०५/७५ द्विस्थाभूः ७५ ७५ लब्ध्या १३०५/७५ ऊनयुता
अन्योन्यहाराभिहतेतिह्रत्वाउभयोः १३०५/७५ ७५/१ समछेदः ॥ १३०५/७५ ५६२५/७५
ऊनः ४३२०/७५ युतः ६९३०/७५ पंचदशभिः १५ अपवर्तितेजातौ ॥
२८८/५ द्वितीय ४६२/५ दलितेजाते आबाधे १४४/५ २३१/५ अनयोः कृति २०७३६/२५ ५३३६१/२५ भुजयोः ६८ ७७

श्रवणेज्ञातेलंबोपिज्ञायते ॥ उपरिस्थापिद्वितीयापंक्तिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५२

हतिः ४६२४ ५६२६ अंतरार्थं समच्छेदाः ११५६०० २०७३६ द्वितीयस्य समच्छेदाः ५७३६१ १४८२२५ २५ २५
अनयोरंतरं तुल्यं ९४८६४ ९४८६४ अन २५ योर्मूलं २५ ३०८ ३०८ जातो भयथा २५ लंबः २५
भूमिः ७५ लंबः ३०८ २५ गुणा २५ अंत्राहतिरिति अंतरायोः ७५ ३०८ वेधः २३१०० छेद
योः ५ १ वधः ५ अनेन अंत्रापार्वधः २३१०० भक्तः ४६२० अस्यार्धं २३१० जातं क्षेत्रफलं क्षेत्रद
र्शनं लंबे ज्ञाते कर्णज्ञानार्थं सूत्रं यल्लंबलंबाश्रितबाहुवर्गविश्लेषमूलं कथितावबाधा तदूनभूवर्गस
